# shrImahAsvAmi aShTottarashatanAmAvaliH

# શ્રીમહાસ્વામિ અષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : shrImahAsvAmi aShTottarashatanAmAvaliH

File name : chandrashekharendra108maTha.itx

Category : aShTottarashatanAmAvalI, deities_misc, gurudev, nAmAvalI

Location : doc_deities_misc

Transliterated by : Ravi Venkatraman sri.sadguru.puja at gmail.com

Proofread by : Ravi Venkatraman, Sunder Hattangadi, PSA Easwaran

Source : https://drive.google.com/file/d/0B6uAhaK8f6enM3NZc0F6ajR0LVE/edit

Latest update : January 7, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2021

*sanskritdocuments.org*

# શ્રીમહાસ્વામિ અષ્ટોત્તરશતનામાવલિઃ

શ્રીકાઞ્ચીકામકોટિપીઠાધિપતિ જગદ્ગુરુ શ્રીમચ્ચન્દ્રશેખરેન્દ્રસરસ્વતી
મહાસ્વમિ શ્રીચરણારવિન્દ અષ્ટોત્તરશતનામાવલિઃ
(શ્રી મઠ પાઠ)

શ્રીચન્દ્રશેખરેન્દ્રાસ્મદાચાર્યાય નમો નમઃ ।
શ્રીચન્દ્રમૌલિપાદાબ્જમધુપાય નમો નમઃ ।
આચાર્યપાદાધિષ્ઠાનાભિષિક્તાય નમો નમઃ ।
સર્વજ્ઞાચાર્યભગવત્સ્વરૂપાય નમો નમઃ ।
અષ્ટાઙ્ગયોગિસન્નિષ્ઠાગરિષ્ઠાય નમો નમઃ । ૫
સનકાદિ મહાયોગિસદૃશાય નમો નમઃ ।
મહાદેવેન્દ્રહસ્તાબ્જસઞ્જાતાય નમો નમઃ ।
મહાયોગિવિનિર્ભેધ્યમહત્વાય નમો નમઃ ।
કામકોટિ મહાપીઠાધીશ્વરાય નમો નમઃ ।
કલિદોષનિવૃત્ત્યેકકારણાય નમો નમઃ । ૧૦
શ્રીશઙ્કરપદામ્ભોજચિન્તનાય નમો નમઃ ।
ભારતીકૃતજિહ્વાગ્રનર્તનાય નમો નમઃ ।
કરુણારસકલ્લોલકટાક્ષાય નમો નમઃ ।
કાન્તિનિર્જિતસૂર્યેન્દુકમ્રાભાય નમો નમઃ ।
અમન્દાનન્દકૃન્મન્દગમનાય નમો નમઃ । ૧૫
અદ્વૈતાનન્દભરિતચિદ્રૂપાય નમો નમઃ ।
કટિતટલસચ્ચારુકાષાયાય નમો નમઃ ।
કટાક્ષમાત્રમોક્ષેચ્છાજનકાય નમો નમઃ ।
બાહુદણ્ડલસદ્વેણુદણ્ડકાય નમો નમઃ ।
ફાલભાગલસદ્ભૂતિપુણ્ડ્રકાય નમો નમઃ । ૨૦
દરહાસસ્ફુરદ્દિવ્યમુખાબ્જાય નમો નમઃ ।
સુધામધુરિમામઞ્જુભાષણાય નમો નમઃ ।

તપનીયતિરસ્કારિશરીરાય નમો નમઃ ।
તપઃ પ્રભાવિરાજત્સન્નેત્રકાય નમો નમઃ ।
સઙ્ગીતાનન્દસન્દોહસર્વસ્વાય નમો નમઃ । ૨૫
સંસારામ્બુધિનિર્મગ્નતારકાય નમો નમઃ ।
મસ્તકોલ્લાસિરુદ્રાક્ષમકુટાય નમો નમઃ ।
સાક્ષાત્પરશિવામોઘદર્શનાય નમો નમઃ ।
ચક્ષુર્ગતમહાતેજોઽત્યુજ્જ્વલાય નમો નમઃ ।
સાક્ષાત્કૃતજગન્માતૃસ્વરૂપાય નમો નમઃ । ૩૦
ક્વચિદ્બાલજનાત્યન્તસુલભાય નમો નમઃ ।
ક્વચિન્મહાજનાતીવદુષ્પ્રાપાય નમો નમઃ ।
ગોબ્રાહ્મણહિતાસક્તમાનસાય નમો નમઃ ।
ગુરુમણ્ડલસમ્ભાવ્યવિદેહાય નમો નમઃ ।
ભાવનામાત્રસન્તુષ્ટહૃદયાય નમો નમઃ । ૩૫
ભવ્યાતિભવ્યદિવ્યશ્રીપદાબ્જાય નમો નમઃ ।
વ્યક્તાવ્યક્તતરાનેકચિત્કલાય નમો નમઃ ।
રક્તશુક્લપ્રભામિશ્રપાદુકાય નમો નમઃ ।
ભક્તમાનસરાજીવભવનાય નમો નમઃ ।
ભક્તલોચનરાજીવભાસ્કરાય નમો નમઃ । ૪૦
ભક્તકામલતાકલ્પપાદપાય નમો નમઃ ।
ભુક્તિમુક્તિપ્રદાનેકશક્તિદાય નમો નમઃ ।
શરણાગતદીનાર્તરક્ષકાય નમો નમઃ ।
શમાદિષટ્કસમ્પત્પ્રદાયકાય નમો નમઃ ।
સર્વદા સર્વથા લોકસૌખ્યદાય નમો નમઃ । ૪૫
સદા નવનવાકાઙ્ક્ષ્યદર્શનાય નમો નમઃ ।
સર્વહૃત્પદ્મસઞ્ચારનિપુણાય નમો નમઃ ।
સર્વેઙ્ગિતપરિજ્ઞાનસમર્થાય નમો નમઃ ।
સ્વપ્નદર્શનભક્તેષ્ટસિદ્ધિદાય નમો નમઃ ।
સર્વવસ્તુવિભાવ્યાત્મસદ્રૂપાય નમો નમઃ । ૫૦
દીનભક્તાવનૈકાન્તદીક્ષિતાય નમો નમઃ ।
જ્ઞાનયોગબલૈશ્વર્યમાનિતાય નમો નમઃ ।
ભાવમાધુર્યકલિતાભયદાય નમો નમઃ ।
સર્વભૂતગણામેયસૌહાર્દાય નમો નમઃ ।

મૂકીભૂતાનેકલોકવાક્પ્રદાય નમો નમઃ । ૫૫
શીતલીકૃતહૃત્તાપસેવકાય નમો નમઃ ।
ભોગમોક્ષપ્રદાનેકયોગજ્ઞાય નમો નમઃ ।
શીઘ્રસિદ્ધિકરાનેકશિક્ષણાય નમો નમઃ ।
અમાનિત્વાદિમુખ્યાર્થસિદ્ધિદાય નમો નમઃ ।
અખણ્ડૈકરસાનન્દપ્રબોધાય નમો નમઃ । ૬૦
નિત્યાનિત્યવિવેકપ્રદાયકાય નમો નમઃ ।
પ્રત્યેકગરસાખણ્ડચિત્સુખાય નમો નમઃ ।
ઇહામુત્રાર્થવૈરાગ્યસિદ્ધિદાય નમો નમઃ ।
મહામોહનિવૃત્ત્યર્થમન્ત્રદાય નમો નમઃ ।
ક્ષેત્રક્ષેત્રજ્ઞપ્રત્યેકદૃષ્ટિદાય નમો નમઃ । ૬૫
ક્ષયવૃદ્ધિવિહીનાત્મસૌખ્યદાય નમો નમઃ ।
તૂલાજ્ઞાનવિહીનાત્મતૃપ્તિદાય નમો નમઃ ।
મૂલાજ્ઞાનબાધિતાત્મમુક્તિદાય નમો નમઃ ।
ભ્રાન્તિમેઘોચ્ચાટનપ્રભઞ્જનાય નમો નમઃ ।
શાન્તિવૃષ્ટિપ્રદામોઘજલદાય નમો નમઃ । ૭૦
એકકાલકૃતાનેકદર્શનાય નમો નમઃ ।
એકાન્તભક્તસંવેદ્યસ્વગતાય નમો નમઃ ।
શ્રીચક્રરથનિર્માણસુપ્રથાય નમો નમઃ ।
શ્રીકલ્યાણકરામેયસુશ્લોકાય નમો નમઃ ।
આશ્રિતાશ્રયણીયત્વપ્રાપકાય નમો નમઃ । ૭૫
અખિલાણ્ડેશ્વરીકર્ણભૂષકાય નમો નમઃ ।
સશિષ્યગણયાત્રાવિધાયકાય નમો નમઃ ।
સાધુસઙ્ઘનુતામેયચરણાય નમો નમઃ ।
અભિન્નાત્મૈક્યવિજ્ઞાનપ્રબોધાય નમો નમઃ ।
ભિન્નાભિન્નમતૈશ્ચાપિ પૂજિતાય નમો નમઃ । ૮૦
તત્તદ્વિપાકસદ્બોધદાયકાય નમો નમઃ ।
તત્તદ્ભાષાપ્રકટિતસ્વગીતાય નમો નમઃ ।
તત્ર તત્ર કૃતાનેકસત્કાર્યાય નમો નમઃ ।
ચિત્ર ચિત્રપ્રભાવપ્રસિદ્ધિકાય નમો નમઃ ।
લોકાનુગ્રહકૃત્કર્મનિષ્ઠિતાય નમો નમઃ । ૮૫
લોકોદ્ધૃતિમહદ્ભૂરિનિયમાય નમો નમઃ ।

સર્વવેદાન્તસિદ્ધાન્તસમ્મતાય નમો નમઃ ।

કર્મબ્રહ્માત્મકરણમર્મજ્ઞાય નમો નમઃ ।

વર્ણાશ્રમસદાચારરક્ષકાય નમો નમઃ ।

ધર્માર્થકામમોક્ષપ્રદાયકાય નમો નમઃ । ૯૦

પદવાક્યપ્રમાણાદિપારીણાય નમો નમઃ ।

પાદમૂલનતાનેકપણ્ડિતાય નમો નમઃ ।

વેદશાસ્ત્રાર્થસદ્ગોષ્ઠીવિલાસાય નમો નમઃ ।

વેદશાસ્ત્રપુરાણાદિવિચારાય નમો નમઃ ।

વેદવેદાઙ્ગતત્ત્વપ્રબોધકાય નમો નમઃ । ૯૫

વેદમાર્ગપ્રમાણપ્રખ્યાપકાય નમો નમઃ ।

નિર્ણિદ્રતેજોવિજિતનિદ્રાઢ્યાય નમો નમઃ ।

નિરન્તરમહાનન્દસમ્પૂર્ણાય નમો નમઃ ।

સ્વભાવમધુરોદારગામ્ભીર્યાય નમો નમઃ ।

સહજાનન્દસમ્પૂર્ણસાગરાય નમો નમઃ । ૧૦૦

નાદબિન્દુકલાતીતવૈભવાય નમો નમઃ ।

વાદભેદવિહીનાત્મબોધકાય નમો નમઃ ।

દ્વાદશાન્તમહાપીઠનિષણ્ણાય નમો નમઃ ।

દેશકાલાપરિચ્છિન્નદૃગ્રૂપાય નમો નમઃ ।

નિર્માનશાન્તિમહિતનિશ્ચલાય નમો નમઃ । ૧૦૫

નિર્લક્ષ્યલક્ષ્યસંલક્ષ્યનિર્લેપાય નમો નમઃ ।

શ્રીષોડશાન્તકમલસુસ્થિતાય નમો નમઃ ।

શ્રીચન્દ્રશેખરેન્દ્રશ્રીસરસ્વત્યૈ નમો નમઃ । ૧૦૮

Encoded by

Ravi Venkatraman sri.sadguru.puja at gmail.com.

Proofread by

Ravi Venkatraman,

Sunder Hattangadi, and

PSA Easwaran psaeaswaran at gmail.com

*shrImahAsvAmi aShTottarashatanAmAvaliH*

pdf was typeset on January 7, 2021

Please send corrections to *sanskrit@cheerful.com*